।। अथ त्रिसप्ततितमोऽध्यायः ।। Chapter-73

माधातोवाच :- १ए कीदृशं जैनंश्रीमालेगौतमादि भविष्यति ।।
तत्कथय मे ब्रह्मन् सर्वज्ञस्त्वं तपोधन ।। १

गौतमो ब्रह्मविज्ञातः श्रीमाले पूजितो२ए द्विजैः ।।
कथं स गौतमो जैनं प्रसिद्धं कुरुते प्रभो ।। २

३ए दीक्षायां गौतमो ब्रह्मन् कारणं किं धरिष्यति
द्विजधर्मः श्रियाः चौत्रे गौतमाधिष्ठितः पुरा ।। ३

श्रीमालस्य प्रतिग्राहं ददौ च गौतमा य वै ।।
सर्वैश्च ब्राह्मणैः स्वामी स्थापितो गौतमो वरः ।। ४

वयोवृद्धस्तपोवृद्धो विद्यावृद्धो हि गौतमः ।।
सर्वधर्मे प्रसिद्धो सो कुलधर्मे विशेषतः ।। ५

स्मार्तपौराणिके धर्मे प्रसिद्धो गौतमो द्विजः ।।
स्वधर्मन्तु परित्यज्य जैनं किं धारयिष्यति ।। ६

अग्रे च किं नैव जैनं गौतमं विकरिष्यति ।।
मम संदेहमुत्पन्नं छेत्तुं त्वमर्हसि प्रभो ।। ७

-०-

१ए किदृशं
२ए पूज्यमान् द्विजैः
३ए दिक्षायां

वशिष्ठ उवाच :- श्रृणु राजन् प्रवक्ष्यामि कथां पौराणिकीं शुभाम् ।।
या च मां कथिता पूर्वं कश्यपेन महात्मना ।। ८

सा च ते कथयिष्यामो विस्तरेण वयं नृप ।।
कल्पान्तरकथा राजन् श्रृणु चैकाग्रमानसः ।। ९

कल्पे कल्पे च हे राजन् श्रीमालं भविता पुनः ।।
गौतमादि जैनधर्मं कल्पे कल्पे युगान्तके ।। १०

अधिकर्षंति सदा राजन् श्रीमाले श्रीनिकेतने ।।
प्रथमं ऋषभो देवो जैनधर्मप्रवर्तकः ।। ११

एकादशसहस्त्राणि शिष्याणां धारितो मुनिः ।।
जैनधर्मस्य विस्तारं[1] करोति जगतीतले[2] ।। १२

[3ए]
कलौ युगे धर्महीना जाता वै बहुला जना ।।
यो जातः कपिलो राजन् विज्ञाय बहुजनकम् ।। १३

स जैनं खण्डनं कृत्वा सर्वज्ञः कपिलो मुनिः ।।
जैनं विहाय स्वं धर्मं स्थापयामास विस्तरान् ।। १४

-०-

१ए विस्तारो
२ए जातितले
३ए कलियुगे
४ए विहाय

स्वे स्वे धर्मे च ये लोक स्थापिता: कपिलेन वै ।।

धर्मयुक्ता च ते लोका वर्तन्ते धर्मकै: स्वकै: ।। १५

एतत्प्रमाणा वर्तन्ते गते कलियुगे नृप ।।

एकदा दिवसे राजन् देशकाश्मिरके पुन: ।। १६

आश्चय: कलिनो ज्ञात्वा जनितोऽम्बिकया सुत: ।।

यो जातोसि महावीरो जैनधर्मप्रवर्तक: ।। १७

अरिहन्तधर्मणैव ध्यायंच साधुरूपकै: ।।

~~बद्धांजलिपुटो भूत्वा~~ बद्धांजलिपुटो भूत्वा वदत् नम्रवचांसि च ।। १८

महावीर उवाच :- किं कुर्वामो वयं मातस्तव कार्यं वदस्व मे ।

गौर्युवाच :- यादृशं तव रूपंच तादृशं कुरु भोसुत ।।

[१ए] बहुवतीताश्च ते धर्मे भविष्यन्ति कलौ युगे ।। १९

जिन: स्वकेन जनित उत्संगेन मया तव ।।

धारित: साधुरूपं त्वं ध्यायज्जैनं च ते हृदि ।। २०

-०-

१ए बहुवतीतास्ते धर्मे

तस्मात्त्वं जैनधर्मं च विस्तीर्णं कुरु भोऽनघ ।।
दयाधर्मेण संयुक्त अर्हन्तं ध्याय त्वं हृदि ।। २१

पूज्यन्ति च त्वां लोका जैनधर्मं प्रवर्तितम् ।।
तव धर्मः कलियुगे बहुलश्च भविष्यति ।। २२

ममाज्ञया वनं गच्छ तपसि च स्थितिं कुरु ।।
तव तपप्रभावेण जैनसिद्धो भविष्यति ।। २३

वन्दितस्त्वं कलौ लोके धर्मलाभो भविष्यति ।।
तव तपप्रभावेण लोको धर्मं चरिष्यति ।। २४

तपो गच्छस्व भोपुत्र वीतरागः स्मरन्कुरु ।।
तपगच्छं च ते लोका वदिष्यन्ति तदा सुत ।। २५

वसिष्ठ उवाच :- गार्यांश्च वचनं श्रुत्वा वीरो वने गमिष्यति ।।
अरिहन्त स्मरणेन राजन् तपः कर्तुं समर्पति ।।
महावीर तपो स्मरणेन कलौकाले गते सति
निराहारो जितात्मा च सर्वं वस्त्रं त्यजेन्नृप ।। २७

स्त्रीपुंभेदादिरहितो परमरूपो भवेत्तदा
एवं च स महावीरो महोग्रमकरोत्तप: २८

तस्य तप:प्रभावेण किञ्चिज्जैनं प्रवर्तते ।।
महावीरो यदा जातो देशेऽकाश्मिरके यदा ।। २९

तत: प्रभृतिमारभ्य जैनधर्म: प्रवर्तते ।।
ईदृशं जैनधर्मं च वर्तते स्वल्पमात्रकम् ।। ३०

एकदा सप्त चाब्दानि दुर्भिक्षमभवन्नृप ।।
महाकालं च भूम्यान्तु नान्नादि जायते यदा ।। ३१

न वर्षन्ति तदा मेघा अन्नं न भवति नृप ।।
दुखिता नृप सर्वेपि श्रीमाल वासिनो जना: ।। ३२

किं कुर्म: क्व गच्छाम: कथयामो हि कस्य वा ।।
न वर्षन्ति चाम्बुवाहा अन्नं न जगतीतले ।। ३३

प्रलयो वर्तते किं वायुनापि समयं विना ।।
अन्तकालो हि लोकानां दृश्यते जगतीतले ।। ३४

-०-

१९ ति

सर्वे श्रीमालिनो लोका कथयामो ब्राह्मणान्निति ।।
मनसि निश्चत्य ते सर्वे गता ब्राह्मणसंनिधौ ।। ३५

जनाऊचु: भूसुरा: स्थापिता दैवैर्युष्माकं गुरवो भुव: ।।
न वर्षन्ति चाम्बुवाहा नान्नं च भवति प्रभो ।। ३६

किं कुर्वामो वयं लोका ह्यन्तकालो हि दृश्यते ।।
अन्नं विना किं जीवेम स्वाहारवासिनो जना: ।। ३७

विप्राऊचु: यूयं वयं हि सर्वेपि वथयामो गौतमाय वै ।।
गौतमोऽस्माकं विप्राणां मध्ये मुख्य: प्रतिष्ठित: ।। ३८

तप: कर्मणि नियत: सर्वकाले प्रवर्तते ।।
प्रात: काले सबीजानि भूमौ क्षिपति गौतम: ।। ३९

मध्यान्हे तत्कालीनां भोजनं कुरुते मुनि: ।।
ईदृशो गौतमो लोका वर्तते श्रीनिकेतने ।। ४०

मा शुचंकुरुत लोका गौतम: पालयिष्यति ।।
तत: श्रीमालिन: सर्वे गच्छामो गौतमाश्रमम् ।। ४१

-०-

इति निश्चित्य ते लोका गता गौतममाश्रमम् ।।
आगतानं च लोकानां गौतमः संमुखो गतः ।। ४२

सादरं च चकाराशु पृच्छति तत्र गौतमः ।।
सर्वेऽपि ह्यागता लोका द्विजसंघेन संवृताः ।।
धन्यत्वं ममाश्रमस्य द्विजा अत्र समागताः ।। ४३

द्विजा उचुः तपोवृद्धा वयोवृद्धा विद्यावृद्धाश्च ब्राह्मणाः ।।
द्विजानां कथयामासुर्गौतमो मुख्यनायकः ।। ४४

तेन श्रीमालिनो लोका आगता शरणं तव ।।
दुर्भिक्षे पालितुं लोकान् त्वंन बिना कः समर्थयेत् ।। ४५

त्वं गुरुश्च द्विजेन्द्राणां लोकानां च विशेषतः ।।
वयं लोकाश्च ते भिक्षा आगतास्तव संनिधौ ।।
द्विजानां वचनं श्रुत्वाह्युवाच गौतमस्तदा ।। ४६

गौतम उवाच : भोभो विप्राश्च भो लोका धन्योऽहमागतेन हि ।।
युष्मदस्मत्पालने च समर्थ ईश्वरः सदा ।। ४७

ह्म

शालीर्भवन्ति ह्यत्रैव मध्यान्हे भोजनं भवेत् ।।
अत्रैव भोजनं सर्वे कुर्वन्तु हि निरन्तरम् ।। ४८

वसिष्ठ उवाच :- गौतमस्य वचः श्रुत्वा सर्वे हर्षत्वमागताः ।।
धन्योऽस्ति गौतमो लोके श्रीमाले श्रीनिकेतने ।। ४९

श्रीमालस्थ प्रतिग्राहः प्रमाणो गौतमेन हि ।।
पालिताश्च प्रजाः सर्वाः सप्तकालेषु प्रत्यहम् ।। ५०

गौतमो नभवेल्लोके पालने कः समर्थवत् ।।
इत्येवं श्लाघयन्तो हि वसन्ति गौतमाश्रमे ।। ५१

एवं प्रवर्तमानेन स कालो व्यतीतो भवेत् ।।
व्यतीते सप्तदुर्भिक्षे ववर्षुर्वारिदा बहु ।। ५२

सजला मेदिनी जाता चान्नेन परिपूरिता ।।
एवमन्नोदकेनैव सुभिक्षं श्रीनिकेतनम् ।। ५३

यदा जातं तदा तत्र द्विजानुर्बुद्धिजस्त्रिय: ।।
पालिताः सप्त दुर्भिक्षं यूयं च गौतमेन वै ।। ५४

अहिल्या गौतमी भार्या वदिष्यति निरन्तरम् ।।
पालिता सम्प्रदुग्मेव सर्वे श्रीमालिनो जनाः ।। ५५

मम नाथं विना सर्वे मृत्युमेष्यन्त्यसंशयम् ।।
इति स्त्रीप्रेरिता विप्रा मतिभ्रंशस्तदाभूवन् ।। ५६

परस्परं वदन्ति च किं कुर्मो हि गौतमे ।।
द्विजाः सर्वे सुसंमील्य गुह्यं कृत्वा परस्परम् ।। ५७

अपराधो गौतमे देवस्तेन वक्तुं क्षमो न सः ।।
ईदृशीं कुर्वते बुद्धिं सर्वे श्रीमालिनो द्विजाः ।। ५८

कुर्वते मानुषीं धेनुं गौतमकारणेन वै ।।
सा धेनुः शालभक्षार्थं समीपे गौतमे गता ।। ५९

शालीभक्षन्तीं तां दृष्ट्वा धेनुं च गौतमस्तदा ।।
वारयामास दर्भेण सा धेनुः पतिता तदा ।। ६०

मृत्युंप्राप्ता त्वं सा धेनुरपरांश्च गौतमे ददुः ।। ६१

१ए भ्रशा
२ ए क्षमान्नभेत्

ब्राह्मणा उचुः  हिंसा कृता त्वया धेनोर्भामो वै गौतम द्विज ।।
अतो विप्रास्त्वया सार्कं भुज्यते नैव पंक्तिशः ।।
तस्मात्त्वं द्विजपंक्तिभ्यो बहिर्भव द्विजोत्तम ।। ६२

वसिष्ठ उवाच :- तच्छ्रुत्वा गौतमो विप्रो ध्यानमाश्रित्य तत्क्षणम् ।।
द्विजानां कौतुकं दृष्ट्वाथ हुवाच ब्राह्मणान्प्रति ।। ६३

गौतमउवाच :- युष्माभिः यह पंक्तिः स्वार्थादिशत मो द्विजाः ।।
यतयत् कार्यं च वदथ तत्तत् कार्यं करोम्यहम् ।। ६४

ब्राह्मणाऊचुः  भागीरथ्या जले स्नात्वा गोदावर्यास्तथा पुनः ।।
१९ अष्टोत्तरकृतस्नानो शुद्धो भवसि गौतम ।। ६५

अस्या गोश्चर्म भो विप्र धारितस्त्वं च वैभुनः ।।
प्रदक्षिणीकृत्य भूमिं स पंक्तियुक्तो भवे द्विज ।। ६६

वसिष्ठ उवाच :- भागीरथीकृतस्नानो गौतमो विप्रप्रेरितः ।।
गोदावर्या अष्टशतं स्नानं कृत्वा द्विजोत्तमः ।। ६७

-o-

१९ अष्टोत्तरकृतः स्नानं

भूमीप्रदक्षिणां राजन् चकार स्वात्मशुद्धये ।।
भूम्या: प्रदक्षिणायान्तु गौचर्म नैव धारितम् ।। ६८

तेन विप्रैर्गौतमाय पंक्तिलाभो न दीयते ।। ६९

गौतमोपि तदा गच्छेत्श्रीसमीपे श्रीयालये ।।
तत्र गत्वा श्रियं प्राह दीनवाक्यै: सुरेश्वरीम् ।। ७०

गौतमउवाच:- अपराधितं मयि मिथ्या श्रीमालवासिभिर्द्विजै: ।।
किं करोमि च मां देवि तव सन्निधिमागत: ।। ७१

सप्तकालेषु हैमातर्लक्षितं तेममाश्रमे ।।
तस्मिन् काले व्यतीते तु ह्यपराधं च मे ददु: ।। ७२

देव्युवाच :- पंचोना खलुपंचाशत् सहस्त्राणि द्विजन्मनाम् ।।
दशोनमेकसाहस्त्रं वैश्यानां च तथैव च ।। ७३

भोजिताश्च त्वया तस्मिन्काले दुर्भिक्षके सदा ।।
तथापि ते चापराधो दत्त: श्रीमाल वासिभि: ।। ७४

-०-

१ ए रूक्षितं

स्त्रीबुद्ध्या सा प्रवृत्तिस्तु तेषां जाता द्विजन्मनाम् ।।
अतस्त्वं जैनधर्मं च श्रीमाले वर्तयिष्यसि ।। ७५

विष्णुधर्मविहीनस्तु लोकस्तत्र भविष्यति ।।
त्वयैव पालिता विप्रा अपराधं त्वयि ददुः ।।
लक्ष्मीहीना भविष्यन्ति तस्मात् श्रीमालवासिनः ।। ७६

गौतम उवाच :- अहं गच्छामि भो मातर्देशे काश्मिरके पुना ।।
जैनधर्मं करिष्यामि श्रीमाले च निरन्तरम् ।। ७७

दुःखीभवति श्रीमाली मम दोषो न दीयते ।।
तवाज्ञया विना देवि न किंचित्क्षमो वयम् ।।
दुःखितोऽहं च विप्रेभ्यः करोमि जैनधर्मकम् ।। ७८

देव्युवाच :- त्वं जानासि भोपुत्र इदं न वेद्मि सांप्रतम् ।।
तवैव यादृशीचेच्छा तादृशं त्वं कुरु सुत ।। ७९

त्वयि जैने प्रवृत्ते तु द्विजा वै दुःखिनः सुत ।।
परं मद्वचनं पुत्र शृणु त्वं कथयामि ते ।। ८०

-०-

१ ए जैधर्म

मम श्रीमालमाहात्म्यखण्डनं न करिष्यसि ।।
श्रीमालवैश्यसमूहस्तव धर्मे चरिष्यति ।। ८१

यस्तु मम धर्महीनः स्यात्तस्मै शापं ददाम्यहम् ।।
मद्धर्मप्रयुक्तो लोको तव धर्मे चरिष्यति ।। ८२

मम माहात्म्यं श्रीमालं श्रृण्वन्तो भक्तितत्परा: ।।
मयि भक्तिप्रभावेण ह्यागमिष्यन्ममालये ।। ८३

ईदृशास्तव धर्मे ये चरिष्यन्ति कलौ युगे ।।
तेषां गृहे ममावासो पुत्रपौत्रादिव धनम् ।। ८४

गौतम उवाच :- श्रीमालखंडनं मातर्न करिष्यामि कुत्रचित् ।। ८५

देव्युवाच :- गच्छ गच्छ द्विजश्रेष्ठ देशे काश्मिरके धुना ।।
गौयापुत्रो महावीरस्त्वां च शिष्यं करिष्यति ।। ८६

जैनधर्मं च श्रीमाले चरिष्यन्ति कलौ युगे ।।
त्वयैव बोधिता वैश्या कैचिज्जैनं च मन्वते ।। ८७

केचिद्वैश्या विष्णुधर्मं चरिष्यन्ति निरन्तरम् ।।
श्रीमाले ईदृशा वैश्या भविष्यन्ति कलौ युगे ।। ८८

धर्मशास्त्राणि जैनानि त्वत्क्लृप्तानि भवन्ति हि ।।

वसिष्ठ उवाच :-

इत्युक्तो गौतमस्तत्र गन्तुं प्रचलितस्तदा ।।
तद् ज्ञात्वा च द्विजा सर्वे देवीं गत्वा प्रसस्नुः ।। ८९

द्विजा ऊचुः

किं दत्ता च भो देवि त्वयाज्ञा गौतमाय वै ।।
जैनधर्मं च स्वीकर्तुं श्रीमाले श्रीनिकेतने ।। ९०

त्वया दत्ते तु श्रीमाले जैनधर्मो भविष्यति ।।
श्रीमालवासी लोकश्च धर्महीनो भविष्यति ।। ९१

गौतमो न निवृत्तः स्यादस्माभिर्वारितो बहु ।।
वारय त्वं च भो मातर्जैनधर्माच्च गौतमम् ।। ९२

मा कुरु जैनधर्मं च विप्राणां दुःखदायकम् ।। ९३

देव्युवाच :-

भो विप्रा न कृतं साधु गौतमे चापराधितम् ।।
सांप्रतं पालिता यूयं दुर्भिक्षैः सप्तवत्सरैः ।। ९४

तस्मिन्नपराधितं विप्रैर्गोहितं तत् कृतं बहु ।।
युष्मद्दोषेण मां विप्रा गौतमो(१ए) वारितो जिनम् ।। ९५

(२ए) जिनधर्मे प्रवृत्ते तु द्विजा दुःखीभवन्ति हि ।।
जैनधर्मं प्रवृत्तास्तु श्रीमालवर्तिनो नराः ।। ९६

तदा गच्छामि श्रीमाला मम दोषो न दीयते ।।
(३ए) पुत्रो वै गौतमो ज्येष्ठः तपोधर्मे च वर्तते ।। ९७

अपराधितं च युष्मा(४ए)भिर्धर्मो नश्यति तेन वै ।।
श्रीमाले जैनधर्मस्तु कलौ वर्तिष्यते सदा ।। ९८

तदा गच्छामि श्रीमालान् मम दोषो न दीयते ।।
युष्मत्कृतं च युष्मा(५ए)भिः भोक्तव्यमेव किं ततः ।। ९९

द्विजा ऊचुः
मतिहीना वयं मातः स्त्रीणां च वशवर्तिनः ।।
गौतमेऽपराधितं देवि कु(६ए)र्वामोन्यथा भवेत् ।। १००

तव पुत्रा वयं देवि तवैवाधिष्ठिताः पुरा ।।
बुद्धिभ्रष्टा वय जाता दग्धितो गौतमश्च वै ।। १०१

-०-

१ए गौतमं

२ए जीनधर्मे प्रवृत्ते

३ए )
) युष्मभ्दिः
५ए )

३ ए पुत्रो गौतमो
३ ए तपधर्मे वर्तते सदा

६ए कुर्वामो

तस्मात्त्वं[1] जननि मातरपराधं क्षमस्व हि ॥
श्रीमालवासिनामस्ति पिता सः गौतमो मुनिः ॥ १०२

देव्युवाच :- किं करवाणि[2] युष्माभि गौतमो दण्डितः पुरा[3] ॥
गौतमं प्रार्थयित्वा च जैनधर्मं निवार्यताम्[4] ॥ १०३

वशिष्ठ उवाच :- श्रिया च प्रेरिता विप्रा गौतमं प्रत्यभाषत ॥ १०४

द्विजाऊचुः गौतम त्वं द्विजश्रेष्ठ पिता त्वं हि सर्वदा[5]॥
जिनधर्मं विहाय त्वमपराधं क्षमस्व मोः ॥ १०५

मोहापराधितं विप्रैर्मतिहीनैस्तव प्रभो ॥
तस्मात्त्वं हि क्षमां कुर्या जैनधर्मान्निवर्तय ॥ १०६

त्वयि जिने प्रवृत्ते च तव धर्मो विनश्यति ॥
तव शिष्या मुनिराज दुःखिता च भवन्ति हि ॥ १०७

-०-

१ए अपराधो
२ए कुर्वामो
३ए तौ
४ए निवारयत
५ए सर्वदाममू

तव धर्मविहीनं तु श्रीमालं तु यदा भवेत्
तदा गच्छेच्च श्रीमालादेवी श्रीः कुलदेवता ॥ १०८

श्रियां गच्छन्त्यां श्रीमालं स्थानभ्रष्टं भविष्यति ॥
तस्मात् क्षमस्वापराधं जैनधर्मान्निवर्तस्व ॥ १०९

गौतम उवाच :- भो भो विप्रा वचो ब्रूत किमथ दीनवाक्पदैः ॥
विनापराधं[१९] दग्धोऽहं भुञ्जतां तादृशं फलम् ॥ ११०

यात विप्राश्च भो दृष्टा अद्य मां वारयेत किम् ॥
पूर्वं किंनैव पश्यन्ति चापराधः कृतो मया ॥
जैनं काश्मिरकं गत्वा लभेद्गृहं[२] वीरदीक्षया ॥ १११

विप्रा ऊचुः त्वं तातस्त्वं प्रभो विप्रस्त्वं स्वाहा त्वं च हीश्वरः ॥
जैनधर्मं त्यज तात विप्राणां बृत्तिहारकम् ॥ ११२

गौतम उवाच :- जैनं न मुंचे भो विप्रा यूयं गच्छत स्वं गृहम् ॥
श्रीमालवासिलोकेषु युष्मद्वृत्तिर्भविष्यति ॥
श्रिया या स्थापिता पूर्वां नैव खण्डां करोमि ताम् ॥ ११३

-०-

१९ विनापराधेन १ व D गाथा
२९ गृहे- गृहे

| | | |
|---|---|---|
| वसिष्ठ उवाच :- | गौतमस्य वचः श्रुत्वा चाहिल्यामवदन् द्विजाः ।। | ११४ |
| द्विजाउचुः | अहिल्ये मातर्विप्राणामपराधं क्षमस्व नः ।। | |
| | गौतमो जैनधर्मं च मा करोतु श्रीनिकेतने ।। | ११५ |
| अहिल्योवाच :- | यूयं गच्छत भो विप्राः किंपृष्ठे आगतेन हि ।। | |
| | वारितुं कः समर्थोऽस्ति भविष्यता(१९)तिप्रवृत्तिषु ।। | ११६ |
| | अहमार्या भविष्यामि गौतमः साधुरेव हि ।। | |
| | नांदीमुखादिश्राद्धेषु मम पूजां कुरुत वै ।। | ११७ |
| | श्रीमाले जैनधर्मं च गौतमादि प्रवर्तते ।। | |
| | श्रीमालवासिलोकानां बुभ्मतुद्वृत्तिर्भविदिह ।। | ११८ |
| द्विजा ऊचुः | आर्यानाम्ना तवपूजां करिष्यामो निरन्तरम् ।। | |
| | नान्दीमुखादिश्राद्धेषु सर्वकार्येषु भक्तितः ।। | ११९ |
| वसिष्ठ उवाच :- | विप्राश्च स्वगृहं राजन् आगताः श्रीनिकेतने ।। | |
| | अदृष्टमीदृशं क्षित्य(मितो) नैव निवर्तते ।। | १२० |

-०-

१९ भविष्यतो

गौतमोऽपि ततो राजन् गतो काश्मिरके तत: ।।
महावीराज्ञीदशा च धत्ते जैनं मनीषितम्[१ए] ।। १२१

ईदृशो गौतमो राजन् जैनधर्मो प्रवर्तते ।।
श्रीमाले जैनधर्मश्च गौतमेन वै प्रसिद्ध: ।। १२२

-o-

इति श्रीस्कंद पुराणे एकाशीति साहस्त्र्यां संहितायां तृतीय परिच्छेदे ब्राह्मविभागे श्रीमालमाहात्म्ये गौतमादि जैनधर्म प्रवृतिनामे त्रिसप्ततितमोऽध्याय: ।।

१ ए मनेप्सितम्